आत्मैकत्वदर्शनम्

Dr. V. RAMAKRISHNA BHATT,
READER IN VEDANTA,
SREE SANKARACHARYA UNIVERSITY OF SANSKRIT,
KALADY.

संसारसर्पपरिदष्टविनष्टजन्तु-
सञ्जीवनाय परया कृपयोपपन्नः।
ब्रह्मावबोधपरमौषधमुद्वहन्य-
स्तं शङ्करं परतरं भिषजं भजामि।।

भारतीयदर्शनेषु शिखामणिभूतोऽद्वैतवेदान्तः केवलमात्मैकत्वं लोकं प्रबोधयतीति विदन्त्येव विद्वज्जनाः। स्थूलसूक्ष्माशेषशरीरावच्छिन्नप्रत्यगात्मा सच्चिदानन्दपरब्रह्म परमात्मैव, अहमिति सर्वानुभवगम्यः, 'अयमात्मा ब्रह्म, तत्त्वमसी'तिमहावाक्यप्रतिपादितः, उपक्रमोपसंहारादिषड्विध- तात्पर्यग्राहकवाक्यैः संशोध्य निश्चित इति ब्रह्मवादिनो वदन्ति।

अत एव 'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इत्यद्वैतवेदान्तसिद्धान्तसारभूतश्चिन्तामणिमन्त्रः सुशोभते। मिथ्याज्ञानजन्यवासनावासितान्तःकरणाः संसारिणो जीवादिभिन्नं ब्रह्मेति जीवब्रह्मणोर्भेदं दृश्यमानमिदं जगच्च सत्यमित्यप्यज्ञानात्प्रत्यवगच्छन्ति। अतो जन्ममरणाधिव्याध्यादिनानादुःखमनुभवन् जीवराशिः वारं वारं संसारसागरं प्रविशति। अत्र श्रीभगवत्पादाः-

"पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्।
इह संसारे बहु दुस्तारे कृपयापारे पाहि मुरारे।।" इति।

'जनिमरणतरङ्गापारसंसारसिन्धुं प्रतर भव' इत्यादि सुव्यक्तमवोचन्। अपि च संसारनिदानं त्वज्ञानमेवेति श्रुतिस्मृतिपुराणानि भृशमुद्घोषयन्ति। अज्ञानं नाम न ज्ञानाभावः, किन्तु कश्चन भावात्मकः पदार्थः, अविद्या अथवा मिथ्याप्रत्ययस्वरूपः। मिथ्याप्रत्यय एवाध्यास इति शाङ्करभाष्ये स्पष्टम्-

"तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः" इति। अर्थात् संसारकारणीभूतायाः अध्यासरूपाया अविद्याया निवृत्तिस्तु विद्ययैव साध्या। तन्निवर्तकी विद्या कथमुपलभ्यते-इति शाङ्करभाष्ये आचार्यभगवत्पादाः प्रतिपादयन्ति-"अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ताः आरभ्यन्ते" इति।

इत्थञ्चाज्ञानं त्वनर्थहेतुः, तन्नाशकं ब्रह्मविज्ञानम् (आत्मैकत्वविज्ञानम्) अद्वैतवेदान्तशास्त्रा-ध्ययनादेव तद्विज्ञानं सम्भवति। तर्हि किं तद्वेदान्तः? - तत्र तावत् मन्त्रब्राह्मणात्मको वेदः, ऋगादिभेदेन चतुर्विधः। कर्मकाण्डः, ज्ञानकाण्ड इति वेदविभागो दृश्यते। वेदानामुपनिषद्भागस्य ज्ञानकाण्ड इति व्यवहारः, ब्राह्मणान्तर्भूता उपनिषद एव वेदान्तपदाभिधेया भवन्ति। 'वेदान्तो उपनिषत्प्रमाणमिति'

वेदान्तसारग्रन्थकारः। वेदान्तपद वाच्योपनिषद्ब्रह्मात्मैक्यबोधिकेति भामतीकारः- 'वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्मावगम्यते' इति। 'ब्रह्मात्मैक्यबोधित्वाद्वेदान्तानाम्' इति वेदान्तकल्पतरुकाराः। उपनिषत्प्रतिपाद्यब्रह्मतत्त्वप्रतिपादका ब्रह्मसूत्रभाष्यभामतीसिद्धान्तबिन्दुद्वैतसिद्ध्यादिवादव्याख्यानग्रन्थाश्च वेदान्तशब्दाभिधेयत्वं भजन्ते। अद्वैतवेदान्तदर्शनम्, आत्मैकत्वदर्शनम्, उत्तरमीमांसा, शारीरकमीमांसा इति नामभिः सुप्रथितमिदं दर्शनम्। 'शरीरमेव शारीरकं तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपता मीमांसा या तथोक्ता' इति वाचस्पतिमिश्रपादानां व्याख्यानम्।

उपनिषत्पयोनिधिनिर्मथनोद्भूतब्रह्मामृतबिन्दुभूतानि सन्ति बादरायणमहर्षिप्रणीतब्रह्मसूत्राणि। ५५५ संख्याकानि तानि चतुर्षु अध्यायेषु विभक्तानि, प्रत्यध्यायं ४ पादाः, आहत्य १६ पादाः। १३४ सूत्रात्मकः समन्वयाध्यायः। १५७ सूत्रात्मकोऽविरोधाध्यायः। तृतीये १८६ सूत्राणि साधनाध्याये, ७८ सूत्राणि सन्ति चतुर्षु फलाध्याये। अधिकरणमित्यपि तत्रावान्तरविभागो वर्तते। उपनिषद्ब्रह्मसूत्र-भगवद्गीताः प्रस्थानत्रयत्वं सहन्ते। एतत्त्रयाणां भाष्यम् अद्वैतविशिष्टाद्वैतद्वैतविशुद्धाद्वैतादि-तत्तत्सिद्धान्ततत्त्वविदोऽलौकिकप्रतिभासम्पन्नाः श्रीमच्छङ्कररामानुजमध्ववल्लभनिम्बार्काचार्यादयो रचयामासुः। जीवब्रह्मैक्यविषयकोऽद्वैतवेदान्तसिद्धान्तः। तदैक्यप्रतिपादनाय सङ्गत्यनुसारेण विद्याप्रपञ्चसृष्ट्यादिविचारः, मोक्षसाधनविचारः, तदितरसांख्यन्यायजैनादिसिद्धान्तखण्डनविचारश्च तत्र तत्र बुद्धिपदमधिरोहति।

आपाततश्चत्वारो विषयाः-जीवः, ब्रह्म, जगत्, अविद्या (माया) इति। देवनरमृगपशुपक्षि-सरीसृपादिनानायोनिप्राप्तिकारणीभूतेयमविद्या (माया)। अकर्तरि, अभोक्तरि, ममतारहिते, अहङ्कारशून्ये आत्मनि कर्तृत्वभोक्तृत्वादिकमध्यासादारोप्य बहुदुःखमनुभवति जीवः। अध्यासादीनां लक्षणं तु भिन्नभिन्नमस्ति। 'स्मृतिरूपः

परत्र पूर्वदृष्टादभासः' इति भाष्यकारः अध्यासं लक्षयति। मायां विवृण्वन्ति विवेकचूडामणिग्रन्थे भगवत्पादाः-

'सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा।।
अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते।।' इति श्लोकादेव सिद्ध्यति मायैव अविद्येति। इन्द्रियागोचरा जगत्सृष्टिसाधनीभूता जन्मरहिता तथापि कार्यानुरोधा अनुमानप्रमाणगम्या सेयं माया अथवा अविद्या अपि च महाद्भुता अनिर्वचनीया च। ब्रह्मसान्निध्यात्सा जगत्प्रसूयते। 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' इति गीता (९/१०) 'तम आसीत्, मायां तु प्रकृतिं विद्यात्, भूयश्चान्ते विश्वमायानिवृत्तिः' इत्यादिश्रुतिस्मृतिपुराणवाक्यानि प्रमाणानि सन्ति मायास्तित्वे। दुर्घटैकविधायिनीयं मायेति श्रीविद्यारण्यस्वामिनः-

'कूटस्थमनुपद्रुत्य करोति जगदादिकम्।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः।।' (प. द. उप) इति।

कथं सा दुर्घटत्वं वहति-

'द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि।
मायायां दुर्घटत्वञ्च स्वतः सिद्ध्यति नान्यतः।।' (प. द.) इति।

तथापि सा अनिर्वचनीया-

'न निरूपयितुं शक्या विस्पष्टं भासते च या।
सा मायेतीन्द्रजालादौ लोकः सम्प्रतिपेदिरे।।' इति पञ्चदशीकारः।

तत्रैवाविद्यां निरूपयन्ति -

'संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि।

इति भ्रान्तिरविद्या स्याद्विद्ययैषा निवर्तते।।' (प. द.) तत्त्वप्रदीपिकायां तु - 'अनादित्वे सति भावरूपं विज्ञाननिरस्यमज्ञान'मिति लक्षणमज्ञानस्यास्ति। विवरणकाराः प्रदर्शयन्ति व्यवहारभेदहेतुं-'एकत्वावगमादेकस्मिन् वस्तुनि विक्षेपप्राधान्येन माया, आच्छादनप्राधान्येनाविद्येति व्यवहारभेद इत्यादि।' (प. वि. पृ. १७३) पञ्चदशीकारा अपि -

'चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।

तमोरजःसत्वगुणाप्रकृतिर्द्विविधा च सा।।' इत्युक्त्वा विशुद्धसत्वप्रधाना माया, मलिनसत्वप्रधाना अविद्या इति व्यवहारभेदं प्रदर्शयन्ति। वस्तुगत्या तयोरेकता, तथापि औपाधिकभेदः अयमिति कश्चन पक्षो दृश्यते-'स्वभावतः परस्परभिन्ने मायाविद्ये' इति। आवरणविक्षेपशक्ती नैमित्तिकीं तयोर्भेदतां निर्वहतः। संसारवृक्षबीजभूताध्यासस्वरूपं विशदयन्ति भाष्ये आचार्यपादाः-'पुत्रभार्यादिषु विकलेषु सकलेषु.....आत्मन्यध्यस्यति, देहधर्मान् स्थूलोऽहं .....इन्द्रियधर्मान्.....मूकोऽहं ....सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' इति (शा. अ. भा. ४) अध्यासबलात् जगद्विषयेषु शब्दादिषु पुत्रकलत्रादिषु ममतामनुभवति, ततस्तत्र रागद्वेषमोहलोभक्रोधादय आवृणन्ति। तदनु प्रवर्तते निवर्तते च संसारी। अत एवोक्तं भाष्यकारैः-

'य एषु मूढा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन।

आयान्ति निर्यान्त्यध ऊर्ध्वमुच्चैः स्वकर्मदूतेन जवेन नीताः।।

विषयाणामानुकूल्ये सुखी, दुखी विपर्यये' इत्यादि। अपि च अज्ञानादेव -

'अपारे संसारे विषयविषपूरे जलनिधौ।

निमज्योन्मज्यायां भ्रमति कुमतिः कुत्सितगतिः।।' इति। भावस्त्वयं-गर्भवासादिदुःख-वृश्चिकसम्पुष्टकूपेऽस्मिन्संसारे मूढानस्मान् निपातयति माया अविद्या वा अध्यासो वा मिथ्याप्रत्यय इति सत्यम्।

प्रत्यगात्माभिन्नं सच्चिदानन्दस्वप्रकाशस्वरूपं परं ब्रह्म। चराचरात्मकस्यास्य जगतो जन्मस्थितिलयानामभिन्ननिमित्तोपादानं भवति च तद्ब्रह्म। 'यतो वा इमानि भूतानि जायन्ते....जीवन्ति.....अभिसंविशन्ति' इति जगत्कारणत्वप्रतिपादकश्रुत्यर्थं 'जन्माद्यस्य यतः' इति गुम्फन्ति महर्षिर्बादरायणाः। उपनिषदि ब्रह्मस्वरूपलक्षणवाक्यानि बहूनि दृष्टिगोचराणि भवन्ति। 'सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानादि'त्यादीनि। नित्यं, निर्धर्मकं, त्रिगुणं, निराकारं निरवयवं, निष्कलङ्कं, निरञ्जनं, स्वप्रकाशस्वरूपं, सर्वज्ञमित्यादिस्वरूपं तस्य सदानन्दस्य। 'न जायते म्रियते.....अजो नित्यः.....न हन्यते हन्यमाने शरीरे' 'नैनं छिन्दन्ति शस्त्राणि.....न शोषयति मारुतः' इत्यादिस्मृतिवचनम्। 'अस्थूलमनण्व.....न तदश्नाति कश्चन' 'निष्कलं निष्क्रियं शान्तं.....अमृतस्य पारम्' 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते' 'एष सर्वेषु भूतेषु गूढ आत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति श्रुतिवाक्यानि विलसन्ति मानभूतानि। इत्थं च त्रिकालाबाधितं पारमार्थिकं देशकालापरिच्छिन्नं जाग्रदाद्यवस्थात्रयरहितं ज्ञानस्वरूपं यद्ब्रह्म वेदान्तेभ्यश्चावगच्छन्ति' इति आत्मैकत्ववादिनः। तथ्यमिदं यद्यपि ब्रह्मचैतन्यमेकमेव, तदेव जीवः, तदेवेश्वरः तथापि जीवेश्वरविभागस्तूपाधित इति तत्त्वविदां मतम्। 'मायायां चित्प्रतिबिम्बः ईश्वरः, अविद्यायां चित्प्रतिबिम्बो जीवः' इति। 'कार्योपाधिरयं जीवः, कारणोपाधिरीश्वरः' इति श्रुतिमनुसृत्याविद्यायां चित्प्रतिबिम्बः ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीवः इति।(सं. शा) 'अन्तःकरणावच्छिन्नं चैतन्यं जीवः, मायावच्छिन्नचैतन्यमीश्वरः' इति (वे. प. भा) एवमत्र बहुपक्षान् पश्यामः। 'न

द्वितीयोऽस्ति कश्चित्' 'आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम्' 'एकं ब्रह्म विभागेन भ्रमाद्भाति न तत्त्वतः, इत्यादिश्रुतिवचनप्रामाण्यात्-अद्वितीयं परं ब्रह्म चैतन्यमेकमेवेति ब्रह्मविदां मतम्। अत्र मधुसूदनसरस्वतीस्वामिपादाः-एकस्यैव चतुर्भुजचतुर्मुखपञ्चमुखाद्याः पुमाकाराः, श्रीभारतीभवान्याद्याश्च स्त्र्याकारा अन्ये च मत्स्यकूर्मादयोऽनन्तावतारा लीलयैवाविर्भवन्ति भक्तानुग्रहार्थमित्यवधेयम्' इति सुस्पष्टं निरूपयन्ति। शरीराद्युपाधिभेदेन जीवे नानात्वमुपयान्ति।

जगत् स्थावरजङ्गमात्मकम्, अपारमार्थिकं त्रिकालबाधितं मायाया कार्यभूतं, स्वाप्नपदार्थवद्विलक्षणं सदसद्विलक्षणमनिर्वचनीयञ्च। 'अतोऽसत्स्वप्नवन्मृषा पृथक्प्रतीतिस्तु मृषा गुणादिवत्। आरोपितं ब्रह्मणि नाममात्रम्' अपि च-

'देहेन्द्रियप्राणमनोऽहमादयः सर्वे विकारा विषयाः सुखादयः।
व्योमादिभूतान्यखिलं च विश्वमव्यक्तपर्यन्तमिदं ह्यनात्मा।।' (१२४) इति।
माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम्।

असदिदमनात्मकं त्वं विद्धि मरुमरीचिकाकल्पम्।। (वि. चू. म. १२५) अर्थात् जगदिदं मिथ्याभूतमिति ध्येयम्। वस्तुगत्या रज्जु वस्तु न सर्पः न तत्सर्पोत्पत्तौ हेतुः, न दंशति सर्पः सः। तथापि रज्जुज्ञानात् भासते तत्र सर्पः, प्रातिभासिकः, अयं सर्प इति भ्रान्तिर्जायते। अयं सर्पो गगनकुसुममिव नासत्, न त्रिकालाबाधितः, अर्थात्र सत् अतः सदसद्विलक्षणः, अनिर्वचनीयः, भासमानः सन्नपि न लभ्यते, यदा नायं सर्पः, किन्तु रज्जुरिति प्रत्ययः संवृत्तः, (रज्जुरूपाधिष्ठानज्ञानमुदेति) तदा रज्ज्वज्ञानं नश्यति, सर्पोऽपि न दृश्यते, इति सर्पो मिथ्याभूतः, तथैव ब्रह्माज्ञानबलात् ब्रह्मणि जगद्भासते इति तत्र भासमानं जगदसत्यम्, ज्ञाननिवर्त्यं च, प्रतिपन्नोपाधिभूते ब्रह्मणि जगतः त्रैकालिकनिषेधो वर्तते, तादृशनिषेधप्रतियोगित्वं जगति विद्यमानं मिथ्यात्वम्। इत्थञ्चाज्ञानकल्पितसर्प इवाज्ञानकल्पितमिदं जगत्, भाष्यादौ

स्वाप्नपदार्थानुदाहरति- 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ. उ.) इति। 'यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृंभितः। तथा जगत्प्रपञ्चोऽयं मयि माया विजृंभितः' इति शङ्करानन्दीव्याख्याने। अत्रैव विवर्तवादोद्भवः, ब्रह्मपरिणामं जगदिति न समीचीनम्-किन्तु ब्रह्मविवर्तं जगदिति राद्धान्तोऽद्वैतवेदान्तस्य।

'अहं प्रजायेय बहु स्याम् इत्यादिनाऽदौ परिणाममुक्त्वा।

विकारमिथ्यात्वमथ ब्रुवाणा विवर्तवादं श्रुतिरानिनाय।।' (६७) इति श्रुतिसम्मतविवर्तवाद इति ज्ञापयन्ति सङ्क्षेपशारीरके। अत्रैव तत्स्वरूपं वर्णयन्ति च-

'अभेदिनो निर्विकृतेरनेकमृषास्वरूपान्तरदर्शकत्वम्।

विवर्तशब्दार्थ इह प्रसिद्धः तरङ्गभेदादिव चन्द्रभेदः।।' इति।

मायामयं मायाकल्पितजगदिदं सर्वथा असत्यं तथापि मायया सत्यमिवाभाति, ततोऽविवेकिनः पुरुषास्तदनुधावन्ति। निर्धर्मके आत्मनि कर्तृत्वादिकमध्यस्य अहं कर्ता भोक्ता मदीय इत्यादिरीत्या वृथा मन्यन्ते, कल्पितवस्तुषु परिभ्रमन्ति च। अत्र श्रीभगवत्पादानां कश्चन श्लोकः सर्वथा सर्वदा सर्वैरपि मन्तव्यः-'शब्दादिभिः पञ्चभिरेव पञ्च पञ्चत्वमापुः स्वगुणेन बद्धाः। कुरङ्गमातङ्गपतङ्गमीनभृङ्गा नरः पञ्चभिरञ्चितः किम्?।।' इति। एकैकेन्द्रियग्राह्यविषयासक्तानां पतङ्गादिजीवानां दुरवस्था, नरास्तु पञ्चेन्द्रियपाशबद्धाः, एतेषां का अवस्था? इति चिन्तयेत्।

एकत्रोपनिषत्प्रपञ्चस्यासत्यत्वं बोधयति, अन्यत्र तत्सृष्टिं प्रतिपादयति, कथमिदमिति? यद्यपि भासमानः सर्पोऽसत्यः, तत्र कथं भासते? कुतो निवर्तते कारणं किमित्यादिप्रश्नानां समाधानं तु तद्विवरणाद्भवति, एवमेवमित्यादि, तथा अनादिमिथ्याज्ञानजन्यवासनादूषितमनस्का जगत्सत्यमित्येवानुमन्यन्ते, तेषां झटिति

बोधस्तु असाध्यः-जगदसत्यमिति तर्हि सत्यमिव भातं जगत्कुतः? वैचित्र्यं कस्मात्? कारणं सत्यं वा असत्यमित्यादिप्रश्नानां समाधानं 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इत्युक्तत्वात् सप्रपञ्चं जगतो निरूपणादेव भवति, एवमस्ति जन्मास्य, स्थितिः, लयश्च, कारणमिदं, कारणञ्च नितरां सत्यम्, इत्यादिज्ञानादनन्तरमेव जायते ज्ञानं हन्त! जगदिदमसत्यमिति। जगति अब्रह्मत्वविज्ञानं च। जगत्सत्यमित्यस्माकं भ्रमः, केवलं ब्रह्म सत्यं तदन्यत्सर्वमसत्यमित्यादिज्ञानोदयाय सृष्टिविचारस्त्वावश्यकः, तस्मात् साधु सङ्गच्छते सृष्टिविचारः 'यतो वा इमानि भूतानी'त्यादिश्रुतिः जगज्जन्मादिकं प्रतिपादयतीति। अतः सृष्टिवाक्यानि प्रपञ्चेऽसत्यत्वं ज्ञापयन्ति न तु वस्तुतत्त्वं साधयन्ति। पूर्वं सूक्ष्माकाशादिपञ्चतत्त्वं, ततः पञ्चमहाभूतानि, तत्र पञ्चीकरणप्रक्रियया तत्सर्वं प्रदर्शयन्ति श्रुतयः, भाष्यकारादयश्च।

'जातस्य हि ध्रुवो मृत्युः' इतिवत् जातं जगत् नश्यति, तत्कारणीभूतं ब्रह्म न जायते न म्रियते, अथवा तत् कमपि विकारं न प्राप्नोति (निर्विकारं तत्)। जगन्निराकरोति श्रुतिः-'नेह नानास्ति किञ्चन' इति। तथा न भूमिर्न तोयं.....न वर्णा न वर्णाश्रमधर्मा.....न माता पिता.....न सांख्यं न शैवं.....न शास्ता न शास्त्रमित्यादि दशश्लोकेषु अनात्मभूतं सर्वं निषेध्य 'तदेकोऽवशिष्टः केवलोऽहम्' इति सच्चिदानन्दचैतन्यमेवास्मत्पदार्थ इति भगवत्पादा उपदिशन्ति। अपि च आत्मानात्मविवेकाय-आत्मानात्मनोर्ज्ञानमावश्यकम्, तत्रानात्मकं जगत्, जगत्किमिति ज्ञानं तु जगत्सृष्ट्यादिज्ञानमूलकम्, अतः सृष्टिविचारः श्रुतिसङ्गतः। देवदत्तः क इति ज्ञानं विना देवदत्तश्चोर इति व्यवहारः प्रत्ययश्चानुपपन्नः, तथा जगद्विज्ञानमन्तरा जगत्पक्षे मिथ्यात्वं कथं साधयितुं शक्यते? अतस्तज्ज्ञानाय जगत्सृष्टिप्रतिपादिका श्रुतिरिति ध्येयम्।

'तत्त्वमसि, अयमात्मा ब्रह्म' इत्यादिमहावाक्यार्थावगमादेव जीवब्रह्मणोरैक्यप्रतिपत्तिः सम्भवा, अहं ब्रह्मास्मीति जीवब्रह्मैक्यप्रतिपत्तिः, अतो

'ब्रह्मविद्ब्रह्मैव भवति' इति श्रुतिः।

'तत्त्वं पदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना।
तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः।।
तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने।'

'लक्ष्यौ तत्त्वं पदार्थौ' 'अहं ब्रह्मेति वाक्यार्थबोधो यावत् दृढीभवेत्।'

'तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत्।।' इत्यादिभगत्पादानामुक्तिभिर्ज्ञायते- यदा परिपुष्टपरिपक्वपरिज्ञानं 'अहं ब्रह्मास्मी'ति जीवब्रह्मतादात्म्यविज्ञानात्मकं सञ्जायते, अहंता ममता, अज्ञानादिकं बाधते, निवर्तते वेति। तत्त्वमसीत्यत्र तत् त्वं असि इति पदत्रयम्। सर्वज्ञत्वादिविशिष्टचैतन्यं तत्पदार्थः, अल्पज्ञत्वादिविशिष्टचैतन्यं त्वंपदार्थः तर्हि वाच्यार्थयोरभेदस्तु नेष्टः, जहदजहल्लक्षणया लक्ष्यार्थोऽत्राभीष्टोऽद्वैतिनाम्। पञ्चदश्यां तु-

'एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते।' इति स्वगतादिभेदशून्यं नामरूपरहितं यद्वस्तुचैतन्यं तदेव तत्पदलक्ष्यार्थः। श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्। देहेन्द्रियप्राणबुध्यादिभूतविलक्षणं यच्चैतन्यं तदेवात्र त्वंपदलक्ष्यार्थः, तयोरेकतां वक्ति असीतिपदम्। 'एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्' इति। तत्त्वमसीत्यत्रानभिप्रेतो वाच्यार्थः, परन्तु लक्ष्यार्थः उद्दिष्टः इति भगवत्पादाः-

'ऐक्यं तयोर्क्षितयोर्न वाच्ययोर्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः।
खद्योतभान्वोरिव राजभृत्ययोः कूपाम्बुराश्योः परमाणुमेर्वोः।।' इति। लक्ष्यार्थमादाय तयोरेकतामभियन्ति मायावादिनः। इत्थं च संशोधिततन्महावाक्यार्थावगतिजन्यः अहं ब्रह्मास्मीति अखण्डाद्वितीयसच्चिदानन्दपरब्रह्मविषयकानुभवः (साक्षात्कारः) सुदृढतामेति, ततो

ब्रह्माज्ञानं निवर्तते, ततश्च ब्रह्माज्ञानं तत्कार्यभूतं जगच्च निवर्तते, अनर्थबीजमेव नष्टं चेत् बाधते। कुतः संसारवृक्षः, कार्येण सहाज्ञाननिवृत्तिरिति वेदान्तसम्मतमतम्। अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृत्तिर्बाधः इति। 'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्या सह कार्येण नासीदस्ति भविष्यति।।' इति विवरणकारवार्तिककाराणां वचनं स्मारयन्ति-अद्वैतसिद्धिकाराः। अत एव ज्ञाननिवर्त्यत्वमिति मिथ्यात्वनिर्वचनं साधु सङ्गच्छते।

शास्त्रविहितनित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वादिगुणगणसम्पन्नपुरुषस्य तादृशजीवब्रह्माभेदविषयकाखण्डाकारचित्तवृत्या गर्भवासादिदुःखहेत्वनाद्यज्ञानं (माया) स्वकार्येण प्रपञ्चेन सह यद्यपि निवर्तते, तथापि प्रारब्धकर्मगुणनिबद्धदेहस्तु स्थास्यति, देहयात्रानिर्वहणाय यथायोग्यं कर्म फलमनुभवति, अनासक्तः सन् व्यवहरति च। 'नाभुक्तं क्षीयते कर्म' इतिवत् भोगात्प्रारब्धकर्मक्षये सति शरीरमपि नश्यति, तत्पश्चात् विदेहमुक्तिः। अतो 'ज्ञानादेव तु कैवल्यम्, ऋते ज्ञानान्न मुक्तिः' इत्यादिवचनानि। जगदधिष्ठानब्रह्मसाक्षात्कारादेव मायानिवृत्तिपूर्वकब्रह्मावाप्तिः (मोक्षः) इति वेदान्त उच्चकण्ठे नोद्घोषयति। 'उपाधिनाशाद्ब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम्' 'वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम्। तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु। अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधम्' इत्यादि। वेदान्तानां प्रवृत्तिस्तु आत्मैकत्वज्ञानप्रतिपत्तये ब्रह्मज्ञानमेव परमलक्ष्यं भवति। अत एव 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इति श्रीभगवत्पादोक्तिः। 'आत्मैक्यबोधेन विना विमुक्तिरित्यपि तेषामेव सांख्यवचनम्।'

यथा नदीजलं समुद्रं प्रविश्य समुद्रजलाभिन्नं भवति, पुनश्च इदं गङ्गाजलं, इदं यमुनाजलमिति पृथक्कृत्य ज्ञातुं न शक्यते, अत्रैक्यं विन्दते जलं, तथा जीवब्रह्मणोरेकतेति ज्ञातव्यम्, न तु पयः क्षीरवदेकता।

आहारभयनिद्रादिसर्वजीवसाधारणकर्म मनुष्यस्यापि, तथापि विवेक इति कश्चन गुणविशेषस्त्वन्यत्र नास्ति मनुष्य एव, कर्तव्याकर्तव्ययोग्यायोग्यसत्यासत्यादिविवेचनकुशलोऽस्ति। जन्तूनां नरजन्म दुर्लभमिति वचनात् दुर्लभमनुष्यजन्म लब्ध्वा प्रयतेत, तदा आत्मैकत्वविद्यामविन्देत, तथा न दृष्टिगोचरः। अत्रैव चिन्त्यम्। किन्तु तत्प्रयत्नं प्रतिबध्नाति माया, मायावशगः सः पापं नेच्छति तथापि पापकर्म करोति। अहो 'अचिन्त्या खलु सा माया। मद्यपानमनारोग्यकारणमिति ज्ञात्वापि प्रतिदिनं पिबति। श्रीरामतत्त्वं किमिति? जानन्नपि रावणः शत्रुबुध्या, तया श्रीकृष्णतत्त्वं सम्यग्जानाति तथापि मम मृत्युदः कृष्णः इति द्वेषबुध्या च युद्धमकरोत् कंसो रावणश्च। तथा आत्मतत्त्वं विजानन्ति केचन जनास्तथापि वेदान्तमद्वैततत्त्वप्रतिपादकं द्विषन्ति किमत्र वक्तव्यम्? तेऽपि मायामकरन्दरसास्वादनततपराः, सन्तु ते तथा, तेन नाद्वैतहानिः।

इत्थञ्चात्मैकत्वविद्यां प्रददातीत्युपनिषत् ज्ञानकाण्डत्वेन सुप्रकाशते। अत एव ब्रह्मविद्या आत्मविद्या वा रहस्यविद्येत्युनिषदर्थः।

'वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च।

अखण्डरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः प्रमाणम्।।' इति श्रीभगवत्पादाचार्याणां वचनात्, प्रमाणीभूताः श्रुतयः एव आत्मैकत्वविद्याप्रतिपत्तय इति ध्येयम्। उपनिषद एवात्मैकत्वदर्शनमेव। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः इति गौडपादाचार्याणां वचनमत्र स्मृत्वा तत्कुरुष्व मदर्पणमिति गीताचार्यवचनोद्बुद्धः तत्कर्म कर्तुमुत्सहे-'शङ्करो लोकशङ्कर प्रीयतामनेन' इति।